चौखम्बा स्तोत्र ग्रन्थमाला (३१)

श्रीभरद्वाजमुनिविरचितं

शिवकर्णामृतस्तोत्रम्

सम्पादकः

स्वर्गीय ज० जगन्नाथशर्मा

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी–१

मूल्यं ०–[illegible]

CHAUKHAMBHA ORIENT...
K. 3..., Gwaldas S...
...51-22

(1)50

❀ श्रीमहागणाधिपतये नमः ❀

श्रीशिवकर्णामृतस्तोत्रम्

प्रथमोऽध्यायः

श्रीपार्वतीसुकुचकुङ्कुमराजमान-
वक्षःस्थलाञ्चितममेयगुणप्रपञ्चम् ।
वन्दारुभक्तजनमङ्गलदायकं तं
वन्दे सदाशिवमहं वरदं महेशम् ॥ १ ॥

उभययोगमतीव ...
त्रिपथगाझरयोश्शिवयोरिव ॥ ६ ॥

नन्दन्नन्दनमिन्दिरापतिमनोवन्द्यं सुमन्दाकिनी-
स्यन्दत्सुन्दरशेखरं प्रभुनुतं मन्दारपुष्पार्चितम् ।
भास्वन्तं सुरयामिनीचरनुतं भव्यं महो भावये
हेरम्बं हिमवत्सुतामतिमहानन्दावहं श्रीवहम् ॥ २ ॥

आलोक्य बालकमचञ्चलमुच्चलत्सु-
कर्णावबोधितनिजाननलोकनं सः ।
साम्बस्स्वमौलिशुभगाननफूत्कृतैस्त-
मालिङ्गयन्नवतु मामलमादरेण ॥ ३ ॥

कण्ठोत्पलं विमलकायरुचिप्रवाह-
मर्धेन्दुकैरवमहं प्रणमामि नित्यम् ।

हस्ताम्बुजं विमलभूतिपरागरीति-
मीशह्लदं चटुललोचनमीनजालम् ॥ ४ ॥

रङ्गत्तुङ्गतरङ्गसङ्गतलसद्गङ्गाझरप्रस्फुर-
द्भस्मोद्धूलितसर्वकायममलं मत्तेभकृत्त्यावृतम् ।
आरूढं वृषमद्भुताकृतिमहं वीक्षे नितम्बस्फुर-
न्नीलाभ्रच्छुरितोरुशृङ्गमहितं तं सन्ततं मानसे ॥५॥

सितमहोज्ज्वलमेकमुपास्महे
विमलपाण्डुरुचिं दधदानने ।
उभययोगमतीव सरस्वती
त्रिपथगाझरयोश्शिवयोरिव ॥ ६ ॥

ललाटलोचनपुरस्फुरणातिरक्तं
यास्ये दिशि प्रधवलावृतभूनभोन्तम्।
चित्रं धनेशककुबन्तविजृम्भिपाण्डु
पश्चात्स्मरामि घनवेणिविनीलमोजः ॥ ७ ॥
भव्यचन्द्रकृशानुभास्करलोचनं भवमोचनं
वारिजोद्भववासवादिकरक्षणं गजशिक्षणम्।
मन्दिरायितराजताचलकन्दरं घनसुन्दरम्
भावयामि दयाभिनन्दितकिङ्करं हृदि शङ्करम् ॥८॥
अनेकरूपाभिरचञ्चलाभिः समाधिनिष्ठासरसान्तराभिः।
प्रतिक्षणं सत्प्रमदावलीभिः प्रपूज्यमानं प्रभुमाश्रयेऽहम् ॥ ९ ॥

ललितं शरदभ्रशुभ्रदेहं करुणापाङ्गतरङ्गरङ्गदीक्षम्।
परिशीलितवेदसौधमोदं कलये किञ्चिदवार्यधैर्यमोजः ॥ १० ॥
सरसिजभवमुख्यैस्सादरं पूजिताभ्याम्
मणियुतफणिरूपैर्नूपुरै राजिताभ्याम्।
सततनतजनालीसर्वसम्पत्प्रदाभ्याम्
बहुमतिहृदयं मे भावुकं श्रीपदाभ्याम् ॥ ११ ॥
विपुलतरविभाभ्यां विश्रुतप्राभवाभ्याम्
प्रमथगणनुताभ्यां प्रस्फुरद्यावकाभ्याम्।
त्रिभुवनविदिताभ्यां दिव्यपुष्पार्चिताभ्यां
शिववरचरणाभ्यां सिद्धिदाभ्यां नमोऽस्तु ॥ १२ ॥

तुङ्गान्तरङ्गघनगाङ्गतरङ्गसाङ्ग-
श‍ृङ्गारसङ्गतमहोल्लसदुत्तमाङ्गम् ।
अङ्गीकृताङ्गभवभङ्गमसङ्गलिङ्ग-
संगीतमीशमनिशं कलयामि चित्ते ॥ १३ ॥

नित्यं प्रभञ्जनसुजीवनपुञ्जमञ्जु-
मञ्जीररञ्जिततरं पुरभञ्जनस्य ।
कञ्जातसञ्जयधुरन्धरमञ्जसा न-
स्सञ्जीवनं भवतु सन्ततमङ्घ्रियुग्मम् ॥ १४ ॥

मन्महे मन्मनोदेशे तत्पदं परमेशितुः ।
यत्सदा वेदवेदान्त-प्रतिपादितवैभवम् ॥ १५ ॥

शरणं ममास्तु तरुणीयुतास्फुर-
च्चरणद्वयी-फणिफणामणिप्रभा ।
सकलं प्रकाशयतु सर्वदेवरा-
ण्मकुटस्थरत्नमहनीयदीपिका ॥ १६ ॥

शरणागतभरणाततकरुणाकरहृदयं-
सुरमानितपरमाद्भुतशरमारितविमतम् ।
शमलालितकमलासनविमलासनविनुतम्-
भज मानस निजमाश्रयमजमाहतमदनम् ॥ १७ ॥

गौरीविलासरसलालससत्कटाक्ष-
वीक्षाहृताब्दविमतामृतरुक्प्रसारम् ।

कन्दर्पदर्पमथनं घननीलकण्ठं
वन्दामहे वयमनादिमनन्तमीशम् ॥ १८ ॥
पदप्रचुरकिङ्किणीकिणिकिणिध्वनिभ्राजितं-
हरिप्रमुखदेवताधृतलसन्मृदङ्गादिकम् ।
धिमिधिमितदिद्धितोद्धुररवानुसारिक्रमं
सदा स्वमतिमङ्गलं दिशतु शाम्भवं ताण्डवम् ॥१९॥
स्वान्तं भ्रान्तिसमृद्धबाह्यविषयव्यावृत्तपञ्चेन्द्रियं-
सद्योजातमुखाद्यमन्त्रसहितं पद्मासनात्यद्भुतम् ।
ध्यायन् मन्मनसि स्मरामि महितं सत्स्वस्वरूपानुभू-
त्यानन्दैकरसोल्लसत्पशुपतेर्वाचंयमत्वान्वितम् ॥ २० ॥

अनन्तनिष्ठातिगरिष्ठयोगं सदाशयैर्वापि विराजमानम् ।
पिनाकपाणिन्तु विनाऽधुनापि शिवं न पश्यामि दयासमुद्रम्॥२१॥
अपूर्वताभासिपुनर्भवाप्तं विभूतिविन्यासविशेषकान्तिम् ।
सरोजभूविष्णुसुरेशकाम्यं द्रक्ष्ये कदा शैवपदं मुदाऽहम् ॥ २२ ॥
सुमुखं भुखमस्य दर्शयद् विधुचूडामणिशोभिदैवतम् ।
सदयं हृदयं सदा कदा कलितानन्दकरं करोति नः ॥ २३ ॥
अक्षरक्षणनिरीक्षणरक्षं दक्षयागवरशिक्षणदक्षम् ।
शिक्षितोग्रविषभक्षणपक्षं लक्षयामि शुभलक्षणदीक्षम् ॥२४॥
गङ्गातरङ्गपतदम्बुकणावृतेन
मस्तेन्दुखण्डमृदुचन्द्रिकयावृतेन ।

प्रत्यक्षतामुपगतेन तदाननेन
श्रीकण्ठ मेऽक्षियुगलं कुरु शीतलं त्वम् ॥ २५ ॥
कदा वा श्रूयन्ते प्रमथजयशब्दद्विगुणिताः
शिवोद्वाहप्राञ्चद्वृषभगलसत्किङ्किणिरवाः ।
कदा वा कैलासाचलनिलयदिव्यागुरुचयाः
कथं वा दृश्यन्ते कलितभसिताङ्गाभिरुचिराः ॥२६॥
अनिन्द्यमानन्दमयं निरामयं
निरञ्जनं निष्कलमद्वय विभुम् ।
अनादिमध्यान्तमहो परं शिवं
हृदन्तरे साधु विदन्ति योगिनः ॥ २७ ॥

अर्धाङ्गोपरि गिरिकन्यकाललाम
प्रोद्भासित्रिनयनमिन्दुखण्डभूषम् ।
भक्तानामभयदमीश्वरस्वरूपम्
प्रत्यक्षं मम भवतात्परात्परं तत् ॥ २८ ॥
अनुग्रहान्मे सुमुखो भवाशु
कृतार्थतामस्मि गतस्ततोऽहम् ।
किमात्मभक्त्या सुमुखे त्वयीश
किमात्मभक्त्या विमुखे त्वयीश ॥ २९ ॥
निपत्य पादाब्जयुगे त्वदीये
विभो विधायाञ्जलिमीश याचे ।

ममोग्रतापं तव दर्शनैक-
कथामृतासारभरान्निरस्य ॥ ३० ॥
नित्यं सुरासुरगणावनकीर्तनीये
सिंहासनस्य गिरिजापतिदर्शनीये ।
गन्धर्वगानरचनानुगतानुकाले
लोलं विलोचनयुगं मम ताण्डवेऽस्तु ॥ ३१ ॥
त्वत्ताण्डवं सकललोकशुभैकमूलं
गौरीमनोहरमनेकविधिक्रमाढ्यम् ।
द्रष्टुं महेश मम चर्मविलोचनाभ्याम्
भोग्यं भवान्तरसहस्रकृतं कदा नु ॥ ३२ ॥

श्रीमन्ति पावनतराणि सुधान्तराणि
सर्वोत्तराणि हृदयाद्वयजीवनानि ।
अन्योन्यमीश तव चाद्रितनूभवायाः
सँल्लापरूपवचनानि कदा शृणोमि ॥ ३३ ॥
अनेकलीलागतिचातुरीयुतं
तवेश वोढुं वृषभस्य नर्तितम् ।
सभूषणध्वानखुरारवं कदा
करिष्यति श्रोत्रयुगोत्सवं मम ॥ ३४ ॥
शार्दूलचर्मपरिवीतपवित्रमूर्ति
चन्द्रावतंसकसमञ्चितचारुमस्तम् ।

नन्दीशवाहनमनाथमनाथनाथं
त्वां पातुमुत्सुकतरोऽस्मि विलोचनाभ्याम् ॥ ३५ ॥
कुरङ्गरङ्गत्तरमध्यभागम्
भुजङ्गमश्रीकरकङ्कणाढ्यम् ।
हस्तं प्रशस्तं तव मस्तके मे
निधाय नित्याभयमीश देहि ॥ ३६ ॥
यावन्न मां भवददर्शनरन्ध्रवेदि
तापत्रयं परिदृढं नितरान्धुनोति।
तावन्महेश कुरु चन्द्रविलोचनेन
दृष्ट्वा सुशीतलमतीव सुधामयेन ॥ ३७ ॥

यावन्न मे मनसि दुष्टतमोभिवृद्धिः
सर्वार्थदर्शनविघातकरी दुरन्ता ।
तावत्क्षणं तव विलोचनरूपसूर्य-
तेजः प्रसारय मयीश्वर दीनबन्धो ॥३८॥
हे रुद्र हे महित हे परमेश शम्भो
हे शर्व हे गिरिश हे शिव हे स्वयम्भो ।
हे देव हे पशुपते करुणार्द्रचित्त
गन्तुं ममाक्षिपदमेष कथं विलम्बः ॥३९॥
किमिदमुदितं वारंवारं त्रिलोकधुरन्धरम्
मदनमथनं मायातीतं मदन्तरवर्तिनम् ।

यमनियमनं कारुण्याम्भोनिधिं परमेश्वरम्
बहु रसनया स्तुत्वा कर्तुं प्रसन्नतरं यते ॥४०॥
हे शम्भो शिव हे महेश्वर विभो वाराणसीश प्रभो
हे मृत्युञ्जय हे हिमाद्रितनयाप्राणेश हे शङ्कर ।
हे कैलासगिरीश हे पशुपते हे शेषभूषाद्दते
हे नन्दीश्वरवाहनाश्रितगते हे देवदेवेश्वर ॥४१॥
हे गौरीकुचकुम्भमर्दनपटो हे सर्वलोकप्रभो
हे हेरम्बकुमारनन्दनगुरो हे चन्द्रचूडामणे ।
हे गङ्गाधर हे गजासुररिपो हे वीरभद्राकृते
हे विश्वेश्वर हे महागणपते हे पञ्चबाणाप्रिय ॥४२॥

हे श्रीकण्ठ जनार्दनप्रिय गुरो हे भक्तचिन्तामणे
हे सर्वाश्रित सर्वमङ्गलतनो हे सत्कृपावारिधे ।
हे रुद्रामितभूतनायकपते हे विष्टपालङ्कृते
हे सर्वेश समस्तसद्गुणनिधे हे राजराजप्रिय ॥४३॥
हे विष्ण्वमेयचरण रणरङ्गातिभीकर ।
करवालहतामित्र मित्रकोटिसमप्रभ ॥ ४४ ॥
वन्दितामन्दकुन्दारविन्देन्दु सत्
सुन्दरामन्दसन्दोहकन्दाकृते ।
मन्दमन्दार्धसंसारनिन्दामते
पाहि मां हे विभो पार्वतीश प्रभो ॥ ४५ ॥

अत्रिनेत्रप्रभूमित्रचित्रांशुसद्
गोत्रनेत्रत्रयीपात्र चित्रानन
शत्रुवित्रासकृज्जैत्रयात्रास्थिते
पाहि मां हे विभो पार्वतीश प्रभो ॥ ४६ ॥
चण्डदोर्दण्डपिण्डीकृतोद्दण्ड- सत्-
तुण्डशौर्यप्रचण्डेभगण्डस्थल ।
कुण्डलश्रीभजत्कुण्डलीश प्रभो
पाहि मां हे विभो पार्वतीश प्रभो ॥ ४७ ॥
भद्ररौद्राभकद्रूतनूजाधिरा-
ण्मुद्रिताक्षुद्ररुद्राक्षमालाधर ।

रुद्र चिद्रूपदृग्वीरभद्राकृते
पाहि मां हे विभो पार्वतीश प्रभो ॥ ४८ ॥
दुर्गमस्वर्गमार्गत्रिवर्गापव-
र्गप्रदानर्गलाश्चन्निसर्गाकर ।
भर्गगर्गादिमौनीड्य दुर्गापते
पाहि मां हे विभो पार्वतीश प्रभो ॥ ४९ ॥
तरुणारुणतुल्यफणस्थमणी–घृणिमंडित-शेषकिरीटधर ।
शरणागतरक्षणदक्ष विभो करुणाकर शङ्कर पालय माम् ॥५०॥
त्रयीनिर्माणचतुर-चतुराननवन्दित !
वन्दितालम्बिविबुध विबुधप्रध रक्ष माम् ॥ ५१ ॥

शशिमकुटतडिदरुणजटमुखकूपीट-
स्फुटनिटिलतटघटितविकटकटुवह्ने ।
वटविटपिनिकटपटुचटुलनटनाति-
प्रकटभटकुटिलपटलविघटन शम्भो ॥ ५२ ॥
रुचिरवरनिचयमृगमदरचनगौरी-
कुचलिकुचरुचिनिचयखचितशुचिमूर्ते ।
प्रचुरतरचतुरनिगमवचनपाली-
निचयनसुवचविकचविमलगुण शम्भो ॥५३॥
अदरदरकरविसरपुरहरणकेली
स्थिरमुरहृदमरधरशवरशरास ।

सरससुरनिकरकरसरसिरुहपूजा-
भरभरण गुरुशरणचरणयुग शम्भो ॥ ५४ ॥
शोणप्रभं चरणमेकमहं नमामि
शुभ्रं विलोचनयुगेक्षणनीलमन्यम् ।
अन्योन्ययोगशिवयोश्शशिपद्मयोश्च
युग्मं कलङ्कमधुपस्फुटयोस्तयोश्च ॥ ५५ ॥
श्रीमदनंतभव्यगुणसीमसमादृतदेवतानते
सोमकलावतंसघनसुन्दरकन्धरबन्धुराकृते ।
कामिनिकामभीम निजकामितदानलसन्महामते
सामजचर्मचेल शिव शङ्कर मामव पार्वतीपते ॥ ५६ ॥

सर्वशरीरगस्त्वमसि सर्वनियामक एक एव सन्
सर्वविदादिदेव हर सर्वदृगीश्वर सर्वरक्षिता ।
सर्वसमश्च मामवतु सन्नतमेवमुपेक्षसे कथं
शर्व भवोग्र भीम शिव शङ्कर मामव पार्वतीपते ॥ ५७ ॥

कर्म तथेति चेद्वदसि काधिकता तव सर्वतः प्रभो
धर्मतरस्य सर्वमपि धर्मत एव भवान् किमन्तरम् ।
निर्मलपुण्यकर्ममहनीयकथं त्वदनुग्रहं विना
शर्म ददाशु देहि शिव शङ्कर मामव पार्वतीपते ॥ ५८ ॥

अन्यमनाथनाथ फणिहंसकमान गृहाण मानसे
धन्य तथा न बोधयति तत्त्वमसीति वचस्त्रिपञ्चतम् ।

शून्यमिदं त्वयि स्फुरति शुक्तिदले रजतं यथार्जुनं
सन्न्यसनादि तस्य शिव शङ्कर मामव पार्वतीपते ॥ ५९ ॥

सन्महनीयमीश तव सावयवं वपुरेव सागमं-
चिन्मयविग्रहस्य परिशीलनमीश्वर मे भवेत्कथम् ।
त्वन्मयभावना तु हृदि दैवत नाऽस्ति नाऽस्ति मे
जन्म निरर्थकं हि शिव शङ्कर मामव पार्वतीपते ॥ ६० ॥

रूपमवेक्षितं न तव रुद्र मयेह कथापि न श्रुता
धूपसुवासनापि गणतोषण नो मम नासिकाङ्गता ।
नापि सुपीतमीषदपि नामकथामृतमङ्घ्रिवारि न
स्थापितमात्ममूर्ध्नि शिव शङ्कर मामव पार्वतीपते ॥ ६१ ॥

पादयुगं कदाचिदपि बालतया तव नार्चितं मया
वेदमहं न शास्त्रमपि वेद्मि तदीश्वर न स्तुतिः कृता ।
वादरतोहमल्पगृहवासनया नितरामहर्निशं
सादरमाशु वीक्ष्य शिव शङ्कर मामव पार्वतीपते ॥ ६२ ॥
स्वर्गनदीशसायक न जन्म भवश्च मृतिश्च संति ते
दुर्गममेषु तद्वहु न दुःखमिदं भवताऽनुभूयते ।
भर्ग तदेवमेभिरतिबाधकभावमुपैषि नो ध्रुवम्
स्वर्गलयस्थितीश शिव शङ्कर मामव पार्वतीपते ॥ ६३ ॥
आकृतिरेव नास्ति तव हा कथमीश्वर भावयाम्यहं
स्वीकृत-हेति-भूति-विषशेष-जटाविकपालमालिके ।

धीकृत-विग्रहे विषमदृष्टि-दिगम्बर पञ्चवक्त्रता
साकृति-भीतिदा हि शिव शङ्कर मामव पार्वतीपते॥ ६४॥
पात्रतयाहमद्य परिभाव्य च दीनदयालुतां तव
स्तोत्रमहं करोमि मम दोषगणं परिहृत्य शाश्वतम् ।
गोत्रभिदादिकाम्यवर गोपतिवाह वितीर्य ते पदम्
शात्रवतोषशोष शिव शङ्कर मामव पार्वतीपते ॥ ६५॥
त्वं जननी पिता च मम दैवतमीश गुरुस्सखेशिता
त्वं जगदीश बन्धुरपि वस्तु च मूलधनं च जीवितम् ।
त्वं जय धामभूमपरतत्त्वमवैमि न किञ्चनापरं
त्वं जनमैशमाशु शिव शङ्कर मामव पार्वतीपते ॥ ६६॥

जयजय हारहीरशशिचारुशरीर विकासहासभृ-
ज्जय जय शान्त दान्त वसुचन्द्ररवीक्षण नित्य नृत्यकृद् ।
जय जय चण्डदण्डधरशासनसन्ततभक्तसक्तहृ-
ज्जय जय शेषभूष शिव शङ्कर मामव पार्वतीपते ॥६७॥

स्थूलात्स्थूलतममुरुज्ञानिहितं सूक्ष्मतममहो सूक्ष्मात् ।
रूपं तावकमतुलं ज्ञातुं मे भवति नेश सामर्थ्यम् ॥६८॥

गौरीमनोहरं दिव्य-सुन्दरं तव विग्रहम् ।
भक्तानुग्राहकं शम्भो दृष्ट्वाऽहं स्तोतुमुत्सहे ॥ ६९ ॥

त्वत्सौभाग्यं त्वद्दयां त्वद्विलासां-
स्त्वत्सामर्थ्यं त्वद्विभूतिं त्वदीक्षाम् ।

त्वद्विद्याश्च त्वत्पदं त्वच्छरीरं-
तत्त्वं शम्भो वर्णितुं कस्समर्थः ॥ ७० ॥

अङ्गं मौक्तिकराशिमञ्जिम महोदारं शिरश्चन्द्रमः-
कोटीरं निटिलं मनोभववधज्वाला-करालाग्नियुक् ।
वक्त्रं ते शिव मन्दहासकलितं ग्रीवं विनीलप्रभं
चेतो दीनदयापरं परमिदं रूपं हृदि स्तान्नु मे ॥ ७१ ॥

व्योम केशास्सुधासूतिः किरीटं स्रक्सुरापगा ।
तारा पुष्पाणि भोः शम्भो तव श्लाघ्यतरं शिरः ॥ ७२ ॥

हस्तौ विनिर्मित-शिवाघनकेशहस्तौ
पादौ पवित्रित-महारजताद्रिपादौ ।

वाचः स्फुटं रचित-बन्धुर-पूर्ववाचो
वृत्तिर्महेश तव संभृतलोकवृत्तिः ॥ ७३ ॥
देहेऽर्जुनं कण्ठतले च कृष्णं
ललाटमध्ये ज्वलनं दृगन्तः ।
भास्वज्जटाल्या-मरुणं महेश-
रूपं त्वदायं बहुदेवचित्रम् ॥ ७४ ॥
चरणं शरणं भरणं करणं हृदयं सदयं वदनं मदनम् ।
अलिकं फलिकं विमलं कमलं तव भूतपते भव भास्वरते ॥
इदमद्भुतमीशाख्य–मविज्ञेयं सुरासुरैः ।
वैराग्ये बहुभोगे च समं समरसं महः ॥ ७६ ॥

कैलासे प्रमथैस्सुरासुरयुतैस्स्वस्वस्तिकं साञ्जलि
प्रस्थं स्थापितरत्नकाञ्चनमहासिंहासने संस्थितम् ।
अर्धाङ्गे निहितां हिमाद्रितनयां सानन्दमिन्दुप्रभं-
त्वां भक्त्या हि भजन्ति शङ्कर तथा तद्द्रष्टुमस्म्युत्सुकः ॥
कारुण्यसीम कपटाचरणैकसीम
वैराग्यसीम वनितादरणैकसीम ।
आनन्दसीम जगदाहरणैकसीम
कैवल्यसीम कलये गणभाग्यसीम ॥ ७८ ॥
श्वेतोच्चलद्गाङ्गतरङ्गबिन्दु-
मुक्तासरानद्धजटाकलापम् ।

निरन्तरं चन्द्रकिरीटशोभि-
नमामि माहेश्वरमुत्तमाङ्गम् ॥ ७९ ॥
भूतित्रिपुण्ड्राश्रितफालभागं
नेत्रत्रयीरञ्जनमञ्जुशोभम् ।
भक्तावली-लालन-लोलहासं
माहेश्वरं पञ्चमुखं नमामि ॥ ८० ॥
त्रिशूलपाशाङ्कुशपट्टिसासि-
गदाधनुर्बाणधरं निजानाम् ।
अभीतिदं कुण्डलिकङ्कणाढ्यं
माहेश्वरं हस्तयुगं भजेऽहम् ॥ ८१ ॥

समस्त-सुरपूजिते स्वरबलाभिनीराजिते
विभूतिभरभासिते विमलपुष्पसंवासिते ।
भुजङ्गपतिनूपुरे बुधजनावन-श्रीपरे
महामहिमनी भजे मनसि शैवपादाम्बुजे ॥ ८२ ॥
जटावलीचन्द्रकलाभ्रगङ्गां
कपालमालाकलितोत्तमाङ्गाम् ।
दिगम्बरां पञ्चमुखीं त्रिनेत्रां
शिवाश्रितां शैवतनुं भजेऽहम् ॥ ८३ ॥
भेरीमृदङ्गपणवानकतूर्यशङ्ख-
वीणारवैस्सह जयध्वनिवेणुनादः ।

सप्तस्वरानुगुणगानमनोहरोऽयं
कर्णद्वयं मम कदा समुपैति शम्भो ॥८४॥
शिवमस्तेन्दुरेखायाश्चन्द्रिकेयं समागता ।
सत्यं यतो निरस्तं मे बाह्यमाभ्यन्तरं तमः ॥ ८५ ॥
संदृश्यतेऽसौ वृषभो ध्वजाग्रे
वसन्मया शृङ्गयुगेन कोपात् ।
वक्रस्वभावं सदृशं द्विकोटि-
मर्धेन्दुमाहंतुमिवोत्पतन् खम् ॥ ८६ ॥
मुक्तिद्वारस्तम्भशुम्भद्विषाणो
लीलाचारश्रीचतुर्वर्गिताङ्घ्रिः ।

प्राप्तोऽयं मे दृक्पथं मन्दगामी
बिभ्रच्छम्भुं शुभ्रदेहो महोक्षः ॥ ८७ ॥
मयि स्थितं शम्भुमवेक्ष्य तूर्ण-
मागत्य धन्या भवतेति संज्ञाम् ।
कुर्वन्निवायाति पुरो वृषोऽयं
मुहुर्मुहुः कम्पनतो मुखस्य ॥ ८८ ॥
भात्ययं वृषभश्शुभ्रां महतीं ककुदं दधत् ।
प्रीतये पुरतः शम्भोः कैलासाद्रिं वहन्निव ॥ ८९ ॥
किमिदं युगपच्चित्रं पुष्पवन्ताविहोदितौ ।
प्रत्यक्षीभवतश्शम्भोरिमे नेत्रे भविष्यतः ॥ ९० ॥

सहस्रांशुसहस्राणां   प्रकाशकमिदं महः ।
प्रार्थितस्सम्प्रति शिवः प्रत्यक्षत्वं गतो मम ॥ ९१ ॥
रोमाञ्चितं सर्वमिदं शरीरं सानन्दबाष्पे नयने मनोऽनु ।
विकासिकामं महदाशु जातंशिवस्य सन्दर्शनतो ममाहो ॥९२॥
अनेक-जन्मार्जितपातकानि दग्धानि मे दर्शनतश्शिवस्य ।
नेदं विचित्रं शिवदर्शनेन कामो हि दग्धोऽखिलदुष्प्रधर्षः ॥९३॥
अहो भाग्यमहो भाग्यं महदीश्वरदर्शनात् ।
कृतार्थोऽहं कृतार्थोऽहं त्रैकाल्येऽपि न संशयः ॥ ९४ ॥
नमस्करोम्यहमिदं कायेन मनसा गिरा ।
आनन्दैकरसं देवं भक्तानुग्रहणं शिवम् ॥ ९५ ॥

नमः परमकल्याणदायिने हतमायिने ।
हिमाचलतनूजाता रागिणेऽतिविरागिणे ॥ ९६ ॥
नमः कुन्देन्दुधवलमूर्तये भव्यकीर्तये ।
निरस्तभक्तसंसारभीतयेऽनेकभूतये ॥ ९७ ॥
भारती-श्री-शचीमुख्य-सौरकान्तार्चिताङ्घ्रये ।
वाराणसीपुराधीश साराचाराय ते नमः ॥ ९८ ॥
नमो वेदस्वरूपाय गुणत्रयविभागिने ।
लोककर्त्रे लोकभर्त्रे लोकहर्त्रे च ते नमः ॥ ९९ ॥
नमस्ते पार्वतीनाथ ! नमस्ते वृषभध्वज ! ।
नमस्ते परमेशान ! नमस्ते नन्दिवाहन ! ॥ १०० ॥

नमस्ते नमस्ते महादेव शम्भो
        नमस्ते नमस्ते परेश स्वयम्भो ।
नमस्ते नमस्ते शिरस्सौरसिन्धो
        नमस्ते नमस्ते त्रिलोकैकबन्धो ! ॥ १०१ ॥

श्रीकरी पठतामेषा शिवकर्णामृतस्तुतिः ।
शिवानन्दकरा नित्यं भूयादाचन्द्रतारकम् ॥ १०२ ॥

इति श्रीभरद्वाजमुनिकृते शिवकर्णामृतस्तोत्रे
प्रथमोऽध्यायः समाप्तः ।

द्वितीयोऽध्यायः

घनमघुमधुरोक्तिस्यन्दमानन्दकन्दं
        वरगुणमणिवृन्दं वन्द्यमोजः पुरारेः ।
भजतु निजजनार्तेर्भेषकृद्रोषदोष-
        द्विषदतिमतियोषाभूषितं भाषितं मे ॥ १ ॥

यद्वीक्ष्यामृतमित्यमर्त्यवनिताः पातुं यतन्ते मुदा
यज्ज्योत्स्नेति चकोरिकाततिरतिप्रेम्णाऽभिधावत्यलम् ।
यत्क्षीराम्बुधिरित्यनङ्गजननी सन्तोषतः प्रेक्षते
तत्तेजः पुरमर्दनस्य धवलं पायात्सदा साधु माम् ॥ २ ॥

स्वोद्वाहार्थं दृढमतिजले शीतले कण्ठदघ्ने
कुर्वन्त्यास्स्वम्प्रति बहु तपश्शैलजायास्तदा नु ।
प्रत्यक्षस्सन्परिधृतकरस्सस्मितः कान्तयाऽलं
प्रीतस्फीतं चकितचकितं प्रेक्षितो नश्शिवोऽव्यात् ॥ ३ ॥

यदङ्गमच्छं गिरिजोत्पलच्छवि
        विलोचनालोकनसंप्रकीर्णम् ।
स्फुटोत्पलं गाङ्गमिव स्म भाति
        स्रोतस्स पायात्सततं शिवो नः ॥ ४ ॥

बुद्धे शुद्धे जननि भवतीं दुष्टभोगानुषक्तां
        कुर्वे सर्वेष्वहमविरतं वक्रकर्मा दुरात्मा ।

तत्त्वं क्षेमं कलय कुशले न ध्रुवं नान्यसक्ता
        नित्यं स्थित्वा चरणयुगले योगरूपस्य शम्भोः ॥५॥

तत्तन्मन्त्रैर्निगमविदितैर्वायुनाऽपूर्य नासान्
        संरुन्धन्तं सविधचरमारेचनादङ्गुलीभिः ।
योगे मार्गन्निभृतनयनं बद्धपद्मासनाङ्घ्रिं
        सेवे भावे हिमगिरितटे तं तपस्यन्तमीशम् ॥ ६ ॥

नित्यं नित्यं निगमवचनैर्धर्ममर्माणि साङ्गं
        कैलासाद्रौ घनमुनिवरैर्वादयन्तं वसन्तम् ।
तत्त्वार्थं प्राग्वचनशिरसां तं त्रयाणां पुराणां
        हर्तारं मानस भज सदा शैलजाप्राणनाथम् ॥७॥

मस्तन्यस्तातुलितविलसच्चन्द्ररेखावतंसो
हेमाभाभिर्विहितमहितश्रीजटाभिस्तडिद्भिः ।
कुर्वन् सर्वानगणितफलान् हंससन्तोषकारी
वारंवारं हृदयमयते मे शरत्कालमेघः ॥ ८ ॥
यस्मिन्सर्वाधिकबहुगुणैर्वञ्चयित्वा मनस्स्वं
हृत्वान्तर्धिं गतवति तपोवैभवेन स्वदेशम् ।
प्रत्याकृष्याहरदगसुता यन्मनस्सार्थदेहं
यावज्जीवं सरसमवतान्नो महेशस्स नित्यम् ॥ ९ ॥
कैलासाद्रौ वनविहरणे हासतो वञ्चनार्थं
वृक्षस्कन्धान्तरितवपुषं धीरमारादद्दष्ट्वा ।

यः पौरस्त्ये सितमणितटे बिम्बितं पार्वतीन्द्रा
नालिङ्गन्मां स परमशिवः पातु मायाविलासी ॥ १० ॥
भवतु मम भविष्यज्जन्म कैलासभूमी-
धरतटवसुधायां बिल्वरूपेण पत्रम् ।
यदि विनिहितमेकं जातु केनापि शम्भोः
सरसपदयुगे वा शेषभाग्यं भजेयम् ॥ ११ ॥
कथय कथय जिह्वे कामदे मे त्रिसन्ध्यं
रविशशिशिखिनेत्रं राजराजस्य मित्रम् ।
प्रमथनिवहपालं पार्वतीभाग्यजालं
गुरुतररुचिमल्लीगुच्छसच्छायमीशम् ॥ १२ ॥

अयि भुजगपते त्वं वर्तसे कर्णमूले
निरतमपि सहस्रं सन्ति वक्त्राणि सन्ति ।
भवति च तव सद्वाक्चातुरी तेन याचे
बहु वद समये मे प्रार्थनां साधु शम्भोः ॥ १३ ॥
विहितरजतशैलं वेदजालैकमूलं
मदनमथनशीलं मस्तकाञ्चत्कपालम् ।
अनलरुचिरभालं हस्तभास्वत्त्रिशूलं
सुरनुतगुणजालं स्तौमि गौरीविलोलम् ॥ १४ ॥
पुरजयघनयोधं पूरितानन्दबोधं
घटितयमनिरोधं खण्डितारातियूथम् ।

मदसुहृदपराधं मन्दबुद्धेरगाधं
भज हृतभवबाधं पार्वतीप्राणनाथम् ॥ १५ ॥
रुचिरकण्ठविकण्ठितमेघभं
स्फटिककान्तिकृताग्रहविग्रहम् ।
प्रणवनादसमोदभरादरं
कमपि योगिवरेण्यमुपास्महे ॥ १६ ॥
स्वकरे विनिधाय पुस्तकं स्वं
घनशिष्यप्रकराय सर्वविद्याः ।
गुरुरादिशति स्फुटं महेशो
वटमूले वटुयुक्तबोधशाली ॥ १७ ॥

भुवनावनशालियोगिवेषं
भुजगाधीश्वरभूषणाततान्ङ्गम् ।
भजताद्भुजतां शुभप्रदं मे
हृदयं हीरपटीरहारि तेजः ॥ १८ ॥

अयमात्तविषन्तु रक्षणार्थं
भयमापन्नमवेक्ष्य विष्टपौघम् ।
वयमाशु भजाम देवदेवं
जयमानन्दभरं च किं न दद्यात् ॥ १९ ॥

निटिलस्फुटभासितत्रिपुण्ड्रं
कटिमध्ये घटिताहियोगपट्टम् ।

हृदये परिभावितस्वरूपं
हृदये भावय भाव भावदावम् ॥ २० ॥

कोपि प्रकामगिरिमाशु सधाम भूमा
रामाभिरामवपुरादरणीयमेव ।
यो भास्करे शशिनि च प्रणवे च नित्यं
गौरीमनस्सरसिजे च चकास्ति भूयः ॥ २१ ॥

तं मल्लिकासुमसमानविभासमानं
सारङ्गपाणिमणिमादिविराजमानम् ।
मुक्ताप्रवालपरिपूरणचारुभद्र-
रुद्राक्षमालिकमहं प्रणमामि रुद्रम् ॥ २२ ॥

नो वैष्णवं मतमवैमि न चापि शैवं
नो सौरमन्त्रविदितं न तु मन्त्रजालम् ।
शङ्का तथापि नहि शङ्करपादपद्मे
सञ्चारमेति मम मानसचञ्चरीकः ॥ २३ ॥
गौरी करोतु शुभमीशविलोलदृष्टि-
मध्ये दधत्यतुलकाञ्चनकण्ठमालाम् ।
तद्दृग्रसाननुभवन् प्रणमन्तमिन्द्रं
किं क्षेममम्बुजभवेति वदन् शिवोऽपि ॥ २४ ॥
कर्पूरपूरधवलाधिक-चारुदेहं
कस्तूरिकाभ्रमरविभ्रमकारिकण्ठम् ।

कल्याणभूधरनिवासविभासमानं
कन्दर्पवैरिणमहं कलयामि नित्यम् ॥ २५ ॥
योऽन्तेऽतिवृद्धिमनयज्जलधीन् पयोधि-
र्यस्येषुधिश्शिरसि देवनदी च मूर्तिः ।
आपोऽभिषिञ्चति जनोऽवरधीर्विचित्रं
तं नारिकेलपयसा कलशीजलेन ॥ २६ ॥
शैवं मतं मम तु वैष्णवमप्यभीष्टं
सर्वेषु दैवतपदेषु समानबुद्धेः ।
सत्यं तथापि करुणामृदु शङ्करस्य
सर्वेश्वरस्य पदमेति सदा मनो मे ॥ २७ ॥

मम वचनमिदं गृहाण सत्यं
दुरभिगमोपनिषद्विचारतः किम् ।
क्षितिभृति रचयन्नितान्तमायां
परमशिवो दृढजिष्णुबाहुबद्धः ॥ २८ ॥

मूर्धराजिततरैन्दवखण्डो
मर्दिताततघनाहितषण्डः ।
दैवतं हि यमशासनचण्ड-
श्शङ्करो मम कृते यमदण्डः ॥ २९ ॥

श्रोत्रकुण्डलितकुण्डलीट्फणा-
रत्ननूत्नरुचिगण्डमण्डलम् ।

सन्मतं सकललोकनायकं
साम्बमूर्तिमनिशं भजामहे ॥ ३० ॥

स्वेषां दुरन्तभवबन्धनदुःखशान्त्यै
सूक्ष्मे मनस्यतिदृढं मुनयो बबन्धुः ।
सर्वेश्वरं दृढशमादिगुणैर्विचित्रं
तत्तुल्यकष्टमपि सूक्ष्मतरस्य नासीत् ॥ ३१ ॥

योगीश्वरः कोपि दिगम्बरस्सन्
जटाधरस्सर्वविदस्ति शैले ।
तद्दर्शने चेत्तव शक्तिरस्ति
निवृत्तिमेवैष्यति देहकष्टम् ॥ ३२ ॥

न यात हे तीर्थंचराः कदाचित्
तपोवनं दुर्गममर्जुनस्य ।
मया किरातः खलु तत्र कश्चिद्
दृष्टस्तनुच्छेदमरं करोति ॥ ३३ ॥
कैलासभूमिभृति मन्दरशैलमूर्ध्नि
स्याद् गन्धमादनगिरौ हिमवत्तटीषु ।
वेदेषु वेदशिखरेषु च दैवतं मे
गौर्यर्धदक्षिणतनौ निजभक्तचित्ते ॥ ३४ ॥
गिरीशकाल्योश्च सितासिताभ-
शरीरयोस्सङ्गतिरर्थयोर्मे ।

स्वान्तेऽस्तु गङ्गायमुनातटिन्यो-
र्यासङ्गतिर्वेति विराजमाना ॥ ३५ ॥
कर्पूरपूरप्रभमिन्द्रनील-
विनीलकण्ठं वपुरीश्वरस्य ।
सुवर्णसङ्काशजटाप्रयोगे
नदीत्रयीसङ्गतिभासिनोऽव्यात् ॥ ३६ ॥
रत्नसिंहासने स्वां निवेश्य प्रियां
भूषणैर्भूषितां तां भवानीं पुरः ।
काममुद्यन्मुखश्रीः प्रदोषोत्सवे
संननर्त स्वयं श्रीभवानीपतिः ॥ ३७ ॥

तापसाँस्तापसानन्तरा देवता
देवता देवताश्चान्तरा तापसाः ।
एवमावृत्य वागीश्वरादिस्थितौ
संननर्त स्वयं श्रीभवानीपतिः ॥ ३८ ॥
कुम्भिकुम्भाहतिस्तम्भसम्भावित-
श्रीमदङ्‌घ्रिद्वयी विक्रमीविक्रमी ।
भक्तिसक्तावलीभुक्तिमुक्तिप्रद-
स्संननर्त स्वयं श्रीभवानीपतिः ॥ ३९ ॥
त्वङ्गदुत्तुङ्गरङ्गद्वराङ्गोद्धृता
मन्दमन्दाकिनीबिन्दुभिर्व्याप्य खम् ।

चारुविन्दत्सु संस्फारताराकृति-
स्संननर्त स्वयं श्रीभवानीपतिः ॥ ४० ॥
देवमुक्तागतं कल्पपुष्पव्रजं
द्राक्सवर्णं समालिङ्गितुं मस्तकात् ।
उत्पतत्यादराद् गाङ्गबिन्दूत्करे
संननर्त स्वयं श्रीभवानीपतिः ॥ ४१ ॥
अच्छवक्षस्थलालम्बिनीलोत्पल-
स्रक्सदृक्षोत्पलाक्ष्या महीभृद्भुवा ।
अर्पितास्वेवमानन्द्य वृत्तोत्सवं
संननर्त स्वयं श्रीभवानीपतिः ॥ ४२ ॥

एकतो भारतीमुख्यदेवीस्तुती-
रन्यतो भारतीश्शब्दभेदाकृतीः ।
सर्वतो भारतीः काममाकर्णयन्
संननर्त स्वयं श्रीभवानीपतिः ॥ ४३ ॥
चञ्चलाभासिता काञ्चनाञ्चद्रुचा
चञ्चला भासिता व्योमयाता जटाः ।
चञ्चला भासितावेव भासीदधत्
संननर्त स्वयं श्रीभवानीपतिः ॥ ४४ ॥
तक्कतो धिक्कतो तौ तथा तैतथै-
तोङ्गदङ्गाङ्गधिन्नर्तशब्दान्मुहुः ।

उच्च रन्हासविन्यासचञ्चन्मुखं
संननर्त स्वयं श्रीभवानीपतिः ॥ ४५ ॥
मूर्च्छनाभिर्गिरां देवतायां समी-
कृत्य तन्त्रीर्नखैर्वल्लकीं च श्रुतीः ।
साधु सप्त स्वरान् वादयन्त्यां मुदा
संननर्त स्वयं श्रीभवानीपतिः ॥ ४६ ॥
शुम्भदारम्भगम्भीरसम्भावना-
गुम्भनोज्जृम्भणो जम्भदम्भावहे ।
लम्बयत्युत्कटं वेणुनादामृतं
संननर्त स्वयं श्रीभवानीपतिः ॥ ४७ ॥

सम्भृतोत्कण्ठिताकुण्ठकण्ठस्वर-
श्रीरमाभामिनीस्फीतगीतामृतम् ।
विश्रुतप्रक्रमं सुश्रुतिभ्यां पिबन्
संननर्त स्वयं श्रीभवानीपतिः ॥ ४८ ॥
दर्शयत्यादराद्वादने नैपुणीं
सन्मृदङ्गस्य गोविन्दमार्दङ्गिके ।
तालभेदं सहोदाहरत्यब्जजे
संननर्त स्वयं श्रीभवानीपतिः ॥ ४९ ॥
समस्तमुखलालनं नहि मुखस्य मे षण्मुख
समस्तमुखलालनं खलु मखैकरेखानन ।

इति स्वसुतवादनं मुदितमुन्मुखैः पञ्चभि-
स्सुतस्य मतिलालनं विरचयञ्च्छिवः पातु नः ॥५०॥
मम हस्तगतास्तु विष्टप-त्रयसृष्टिस्थिति संहतिक्रियाः ।
इति सूचयितुं वहन्निव त्रिशिखं शूलमयं शिवोऽवतु ॥५१॥
भस्मविलेपाशांशुकभोगी-सक्तजटस्संसारविरागी ।
ब्रह्मविचिन्ताभागनुरागी-पातु सदा ममादिमयोगी ॥५२॥
अर्धाङ्गे हिमशैलजां दधयन्बन्धुगृहं तद्गुरोः
कैलासाचलमुद्वहन्करतले कृत्वा सुमेरुं धनुः ।
गङ्गां मूर्धतले तदाभमपि सन्मौलो विधुं तत्कृते
काशीवासकरश्शुभं वितनुतां शम्भुर्महाकार्मुकः ॥ ५३ ॥

कावाहे शैलजाते वपुषि द्रुततरालिङ्गिता वर्तते ते
मायामद्वेषधारी वद विदितमहो तावकीनं हि शीलम् ।
इत्युर्वी भृत्तनूजां क्षणचकिततरां भीषयित्वा सहासो
वीक्ष्यात्मानं तदङ्गप्रतिफलितमुमाप्राणनाथोऽवतान्नः ॥५४॥

पञ्चबाणविजयस्य काञ्चन-
स्तम्भताविलसितप्रतीतिकृत् ।
राजताद्रिनिहितो धिनोतु मां
श्वेतपीतमहसोस्समागमः ॥ ५५ ॥

अन्योन्यनैर्मल्यसमृद्धिभाजो-
रन्योन्य-देह-प्रतिबिम्बनेन ।

तेजोर्धनारीश्वरयोर्द्वयोस्सत्
प्रकाशमानं मम मानसेऽस्तु ॥ ५६ ॥

श्मशान-भू-संचरणादरोऽपि
श्मशान-भस्माकलितोऽपि नित्यम् ।
कपालमालाऽभियुतोपि चित्रं
स्वमङ्गलादानवपुर्महेशः ॥ ५७ ॥

वन्दे वन्दे वेदशिरोवर्णितकेलिः
वन्दे वन्दे पालितपादानतपालिम् ।
वन्दे वन्दे निर्जितमत्तारिपुरालिं
वन्दे वन्देऽहं हृदि गङ्गाधरमौलिम् ॥ ५८ ॥

अन्योन्य-संवर्धित-तत्प्रशंसा
दिगम्बराभूतिजटावतंसाः ।
सहस्रशस्सम्प्रहसा वदन्ति
शम्भो महेशेश्वर शङ्करेति ॥ ५९ ॥
अतो महत्सङ्गतिरेव कार्या
यतो जटाधारिसुपञ्जरस्थाः ।
अमी शुकाश्चानुवदन्ति चित्रं
शम्भो महेशेश्वर शंकरेति ॥ ६० ॥
कैलासभूमीभृदिलातलेषु
विभूति-रुद्राक्ष-धराखिलाङ्गाः ।

तदेकभक्ताः प्रमथाः पठन्ति
शम्भो महेशेश्वर शङ्करेति ॥ ६१ ॥
धिक्तस्य जिह्वां वचनं च धिग्धिग्
धिग्जीवनं जन्म कुलं च धिग्धिक् ।
नित्यं मुदा यः पुरुषो न वक्ति
शम्भो महेशेश्वर शङ्करेति ॥ ६२ ॥
स पण्डिताग्र्यस्स हि लोकपूज्य-
स्स दिव्यभाग्यस्स हि भव्यजन्मा ।
यो वक्ति मोदातिशयेन नित्यं
शम्भो महेशेश्वर शङ्करेति ॥ ६३ ॥

जिह्वा मदीया वसताद् दुरुक्ति-
नीचस्थितिः क्षारजलान्विता या ।
सोमस्य नामाख्यसुधासमुद्रे
शम्भो महेशेश्वर शङ्करेति ॥ ६४ ॥
विहाय भेरीघनतूर्यवेणुवीणामृदङ्गादिरवं च गानम् ।
शृणोतु मे कर्णयुगं सुशब्दं शम्भो महशेश्वर शङ्करेति ॥६५॥
प्राणप्रयाणे पततादनन्त-संसारतापान्तमहौषधं तत् ।
नामामृतं मद्रसनाग्रदेशे शम्भो महेशेश्वर शङ्करेति ॥६६॥
शान्तं चन्द्रकिरीटमुज्ज्वलतमं पद्मासनस्थं विभुं
पञ्चास्यं त्रिदृशं सशूलपरशुं खड्गं सवज्रं शुभम् ।

नागं पाशसृणीसुघण्टमभितः कालानलं बिभ्रतं
भव्यालंकृतिमर्करत्नधवलं श्रीपार्वतीशं भजे ॥ ६७ ॥
अमेयमानन्दघनं गिरीशं भजामि नित्यं प्रणवैकगम्यम् ।
उमापतिं शङ्करमुज्ज्वलाङ्गं महेश्वरं साधु मनोनिवेशम् ।६८।
आदिस्वरं तृतीयेन संहितं बिन्दु-संयुतम् ।
ध्यायामि हृदये योगिध्येयं कामितमोक्षदम् ॥ ६९ ॥
न जननीजनगर्भनिवासजं न च निरन्तरसंसृतिजं मम ।
न यमदूतकृतं च भयं यतोऽनवरतं मम दैवतमीश्वरः ॥७०॥
महावीर रुद्रं मनोजातिरौद्रं
महीभृत्कुमारीमनःपद्ममित्रम् ।

मखध्वंसिनं सम्मतश्रीकरं म-
न्मनोमन्दिरं तं महादेवमीडे ॥ ७१ ॥
शिवेतरापहन्तारं शिवसन्धायिनं परम् ।
शिवानन्दकरं शान्तं शिवं सेवे निरन्तरम् ॥ ७२ ॥
वासुकीश्वरविभूषितकण्ठं वामभागपरिपूरितबालम् ।
वारणास्यभिधपट्टणनाथं वामदेवमधिदैवतमीडे ॥७३॥
यदुनाथपद्मभववासवादयो
यदुदारभावगणनायकाश्शिवम् ।
यमशासनोग्रतरमाश्रयंत्यहो
यमनाथनाथमहमाश्रयामि तम् ॥ ७४ ॥

नमस्सृष्टिस्थितिलयान् कुर्वते जगतां सदा ।
शिवयैक्यं गतायास्तु परमानन्द-रूपिणे ॥ ७५ ॥
लिङ्गरूपं जगद्योनिं सत्रिशूलाक्ष-मालिकम् ।
श्रेष्ठं समृगखट्वाङ्ग-कपाल-डमरुं भजे ॥ ७६ ॥
लम्बोदरगुरुं नित्यं हंसवाहनसेवितम् ।
यन्त्रतन्त्ररतं लोक-रञ्जनं भावये शिवम् ॥ ७७ ॥
शम्भो पश्य न मां भयं भवति ते दग्धो दृशा मन्मथः
कण्ठे ते भुजबन्धनं न मम भोस्तत्रास्ति हालाहलः ।
गण्डे गण्डतलार्पणं न भुजगः कर्णेन चालिङ्गनं
देहे तत्र विभूतिरित्यपहसादुक्तोऽम्बयाऽव्याच्छिवः ॥ ७८ ॥

श्रीगौरीं प्रणयेन जातु कुपितां वैमुख्यसन्धायिनी-
मङ्गीकारमकुर्वतीमनुनयैः कन्दर्पचेष्टास्वलम् ।
संक्रान्तः किमुरोजयोर्हृदि च ते पाषाणभारः परं
तातस्येति वदँश्चिरादभिमुखीकुर्वञ्छिवः पातु नः ॥ ७९ ॥
धि-धिमि-धिमि-धिमि-शब्दैर्बन्धुर-पद-मन्दरं नटन्तं तम् ।
झं-झण-झण-झणरावा-रञ्जित-मणिमण्डनं शिवं सेवे ॥८०॥
प्रत्यक्प्रकाशं प्रथिताघनाशं गानप्रवेशं गतमोहपाशम ।
वशीकृताशं वनितैकदेशं काशीपुरीशं कलये महेशम् ॥८१॥
देवाय दिव्य-शशिखण्ड-विभूषणाय
चर्माम्बराय चतुराननसेविताय ।

सामप्रियाय सदयाय सदा नमस्ते,
सर्वेश्वराय सगणाय सदाशिवाय ॥ ८२ ॥
रक्षाधिकारी हरिरात्तसत्त्वो ररक्ष लोकानिति किंविचित्रम् ।
लयाभिमानी सततं जगन्ति रक्षत्यहो शीघ्रतरं पुरारिः ॥८३॥
कृपानिधिख्यातिरतिप्रसिद्धा
शम्भोस्तदा शङ्करनामधेयम् ।
विभात्यसाधारणमादिदेव-
स्सनातनोऽयं निखिलैः प्रसेव्यः ॥ ८४ ॥
चञ्चलमतितरणं किं पञ्चाननपादपद्मसंचरणम् ।
अञ्चितविभवः को वा वञ्चितपञ्चाशुगश्च सेवेतम् ॥ ८५ ॥

कलित-भवभीतिभेदे करुणा-संघटन-पूरितामोदे।
विलसतु शङ्करपादे विद्या मम चारु-किङ्कर-श्रीदे ॥८६॥
चान्द्री रेखा शिखायां तटिदुपम-जटा-स्वच्छगङ्गातरङ्गाः
कर्णद्वन्द्वे भुजङ्ग-प्रवरमय-महाकुण्डले दाहशीले।
वह्नि-ज्वाला ललाटे गरलमपि गले वामभागे च योषा
यत्स्वानन्दं महस्तत्प्रभवतु हृदि मे कोटि-सूर्य-प्रकाशम् ॥ ८७ ॥
जटा-जूटत्वङ्गत्तरसुरनदी-तुङ्गविलस-
त्तरङ्गोद्यद्बिन्दूत्कट-विकचमल्लीसुमभरः।
निजार्धाङ्गस्वङ्गीकृतगिरिसुतामङ्गलतनु-
र्महेशः पायान्मामनिश-निजचिन्तामणिनिभः ॥ ८८ ॥

घनाम्बुदनिभाकृतिं घटितमिन्दुपुष्पोल्लस-
ल्लताग्रथितमौलिकं ललितनेत्ररक्तोत्पलम्।
सचापशर-भीषणं समणिमन्त्रसिद्धिक्रियं
धनंजयजयं भजे धृतकिरातवेषं शिवम् ॥ ८९ ॥
धात्रीमनन्तां विपुलां स्थिरां विश्वम्भरां क्षमाम्।
गाङ्गोत्रामवनीमाद्यां मूर्तिं शम्भोर्भजाम्यहम् ॥ ९० ॥
अमृतं जीवनं वारि कमलं सर्वतोमुखम्।
द्वितीयमस्य रूपं च भजेऽहं परमेशितुः ॥ ९१ ॥
ज्वलनं पावकं दिव्यं सुवर्णं काञ्चनं शुचिम्।
तृतीयमूर्तिं तेजोऽहं कलये पार्वतीपतेः ॥ ९२ ॥

सदागतिं जगत्प्राणं मरुतं मारुतं सदा ।
चतुर्थन्तं मूर्तिभेदं शङ्करस्य भजाम्यहम् ॥ ९३ ॥
आकाशं पुष्करं नाक-मनन्तं शब्दकारणम् ।
पञ्चमं मूर्तिरूपं च शम्भोस्सेवे निरन्तरम् ॥ ९४ ॥
प्रभाकरमिनं हंसं लोकबन्धुं तमोऽपहम् ।
त्रयीमूर्त्तिं मूर्तिभेदं षष्ठं शम्भोर्भजाम्यहम् ॥ ९५ ॥
शुभ्रांशुं सोमममृत-करं चन्द्रमसं सदा ।
कलानिधिं मूर्तिभेदं सप्तमं शूलिनो भजे ॥ ९६ ॥
आहिताग्निं यागकारं यज्वानं सोमयाजिनम् ।
अष्टमं मूर्तिसंभेद-मष्टमूर्तेर्भजाम्यहम् ॥ ९७ ॥

हस्तद्वयेनाङ्घ्रितलद्वयं स्व-मूरुद्वये संपरियोजयन्तम् ।
पद्मासने रूढतरं जपन्तं मुनिं महेशं मुहुराश्रयेऽहम् ॥९८॥
सततं सितचन्द्रमण्डलोपरिपद्मासनसंस्थितं विभुम् ।
घनमञ्जुलचन्द्रवर्णकं विलसच्चन्द्रकलाधरं परम् ॥ ९९ ॥
योगमुद्राक्षमालादि-द्योतिताधःकरद्वयम् ।
विधृतामृतसौवर्ण-कलशोर्ध्वकरद्वयम् ॥ १०० ॥
सोमार्काग्नि-विलोचनं धृतजटाजूटं सदानन्ददं
सन्नागाश्वितयज्ञसूत्रमधिकं नागेन्द्रभूषाधरम् ।
श्रीमन्तं भसिताङ्गरागसहितं शार्दूलचर्माम्बरम्
भक्तानुग्रहकारणं मनसि तं श्रीरुद्रमीडे परम् ॥ १०१ ॥

श्रीकरी पठतामेषा शिवकर्णामृत-स्तुतिः ।
शिवानन्दकरा नित्यं भूयादाचन्द्रतारकम् ॥ १०२ ॥

इति श्रीभरद्वाजमुनिकृते शिवकर्णामृतस्तोत्रे
द्वितीयोऽध्यायः समाप्तः ।

तृतीयोऽध्यायः

श्रीमन्तं स्वनितान्तकान्तपदकञ्जस्वान्तचिन्तामणिं
शान्तं नान्तरमन्तकान्तकमतिक्रान्तप्रियं सन्ततम् ।
सन्तं भान्तमनन्तकुन्तलसुविभ्रान्तं महान्तं शिवं
दान्तं कन्तुरिपुं तमन्तरहितं स्वर्दन्तिकान्तिं स्तुमः ॥ १ ॥
एकं वन्दनमस्तु ते परमितो हे नित्यकर्माधुना
हे नैमित्तिककर्मतोपि च तथा तीर्थान्यये ! वो नमः ।
क्षेमं वो गृहदेवता भवदभिप्रायानुसारोस्तु मा
वारंवारमहं करोमि च नुतिं शम्भोरशम्भोः कुतः ॥ २ ॥

अष्टदलपद्मबन्धस्रग्धरावृत्तम्

सारानिद्रामुदश्रीकरमहिमयुता त्रासवद्राविकासा
साकाविद्रावसत्रा रजतगिरितटस्थानसद्मापभासा ।
सा भा पद्मासनस्था गिरिश शिवतनुः ख्यातसुज्ञानुदासा
सादानुज्ञा सुतख्याभिरतिरवतु वः श्रीदमुद्रानिरासा ॥ ३ ॥

हारहीरसमाकारकारुण्यजलधे प्रभो ।
वरवाराणसीनाथ गुरो गौरीश पाहि माम् ॥ ४ ॥

भव भवनितरौप्यशैलगङ्गा शरशरणेन्दुकिरीटशस्तमस्त ।
स्वमहितहितदानमानसे मे वस वसनीकृतदिक्करीन्द्रचर्मन् ॥ ५ ॥

मानमानससन्देहीमत्क्लेशापहरे हरे ।

मानमानसदादित्ये सत्ये पुरहरे हरे ॥ ६ ॥

षोडशदलपद्मबन्धः

सवासहंसभं सत्या सक्तसर्वं सभं समम् ।
सवास वसमासक्ति सरसत्रं सखे सदा ॥ ७

यप्यभक्तिस्सदा शम्भौ निश्चला स पुमान् पुमान् ।
स पुमान् यत्र जननंसम्प्राप्तस्तत्कुलं कुलम् ॥ ८ ॥

अष्टत्रिवलयकविपतिनामाङ्कितचक्रबन्धशार्दूलवृत्तम्

सर्वेशं चतुरङ्गवेन्द्रियवशश्शेषाहिताख्यं भवं
तत्पाकक्रतुकारकप्रियमकध्वंसि स्वबन्तध्रुवम् ।

कर्पूरामितभं जटावयव चित्रं सप्रधत्वं वरं
रङ्गद्भासमनन्तमन्धकरिपुं वन्दे शिवं शङ्करम्॥ ९ ॥
निजजनावनं नित्यपावनं भुजगकङ्कणं भूतिलेपनम्।
भज सदाशिवं भावसंस्तवं त्यज भवे रतिं त्यक्तसद्गतिम्॥ १०॥

नागबन्धस्रग्धरावृत्तम्

तं हंसं विश्वरूपं महितसुरवरप्रीणनं सप्रमेयं
नम्रासक्तं सुधातिप्रविमलमलघुं युक्तमस्तं शरेण।
कामं सोमेन च श्रीसततनुतविभं प्रीतिदं रूढियुक्ता
तथ्यं शर्वं सकामा स्थिरतरमनवं चक्रिसुत्रं भजेऽहम् ॥११॥
देवतावनिताकरार्चितदिव्यपादसरोरुहौ

सेवमानसुरासुरोरगसिद्धयक्षशुभावहौ।
भावनामहितौ जगत्त्रयपालनावविनश्वरौ।
भावयामि सदा हृदा मम पार्वतीपरमेश्वरौ ॥ १२ ॥

खड्गबन्ध-सुगन्धिवृत्तम्

तारहारहीरसौरनीरपूरसारभं
भङ्गसङ्गतान्यमङ्गलप्रदं हृदम्बुजे।
जेतृपातृदातृताप्तमाप्तवागदुर्लभम्
भञ्जनं पुरां नृरञ्जनं निरञ्जनं भजे ॥ १३ ॥
मस्ते चन्द्रकला-किरीटमलिके भूतिस्त्रिपुण्ड्रेक्षणे
ग्रीवायां कटिकालकूटमुरसि स्फाराहिहारावलिम्।

वामाङ्के हिमशैलजां करयुगे शूलं मृगं चोद्वहन्
मौनीन्द्रैः परितोऽर्चितः पशुपतिर्योगीश्वरो राजते ॥ १४ ॥

शार्ङ्गबन्धः

शङ्करं परमं काममकामं लोकरक्षकम् ।
कन्दर्पदमनं शान्तं सदानन्दं भजेऽनिशम् ॥ १५ ॥

नारदादि-मुनिवन्दितपादं शारदापतिमुखस्तुतकेलिम् ।
क्रूरवारणविदारणदक्षं नीरदाभगलमीश्वरमीडे ॥ १६ ॥

धनुर्बन्धः

हर शङ्कर सर्वेश त्रिपुरारे महाप्रभो ।
पाहि पाहि भवार्तं मां हरीष्ट जितमन्मथ ॥ १७ ॥

मत्तपदग्रस्तम्

विलसमानसमानयुताकृतिं सुरविराजिविराजिततेजसम् ।
विहितमोहतमोहतिमीश्वरं भज मनो मम नो मतिरन्यथा ॥१८॥

निष्कण्ठ्ययमकम्

मदनमदनदीनं मानितामर्त्यसेवं
शमनशमनधीरं शाश्वतं देवदेवम् ।
जननजननदाने जातभव्यस्वभावं
सदनसदनमीडे साधु संसारदावम् ॥ १९ ॥

हलबन्धः

कनद्ज्ञानविभो शङ्का का शम्भो विनतस्य ते ।

मम दीनदयासिन्धो नवनाघघनावन ॥ २० ॥

गुच्छबन्धः

धीरमारहरश्रीद वेदसादर भो विभो ।
शम्भो सोम मम श्याम-ग्रीव देव भव प्रभो ॥ २१ ॥

निस्तालव्यम्

गङ्गातुङ्गतरङ्गसङ्गतिलसन्मस्तं समस्तामरी-
हस्तस्वस्तरुसूनसंस्तवघनप्रस्तावनिस्तारितम् ।
भावे बम्भरदम्भगुम्भितविभासम्भावितग्रीवकं
सेवे सेवकभावुकप्रदकृपापूरं परं दैवतम् ॥ २२ ॥

गोमूत्रिकाबन्धः

नन्दिवाहं नतशेषं देवं देवेश्वरं परम् ।
निन्दिताहं कृताश्लेषं शिवं सेवे निरन्तरम् ॥ २३ ॥

निरोष्ठ्यम्

इन्दुचन्दनकुन्दसुन्दरगात्र गोत्रसुतारते
नन्दनन्दननन्दिताधिकजैत्रयात्रहृतक्रतो ।
कन्दनिन्दककान्तिकन्धर कालकाल दयानिधे
चन्द्रशेखर शङ्करालघु शं कुरु श्रितसन्ततेः ॥ २४ ॥

छुरिकाबन्धः

भीतकाम दमस्फार परापर सुरासुर

रक्ष मामविदज्ञेय यज्ञेदविममाक्षर ॥ २५ ॥

निर्मूर्धन्यम्

भूतेश भूतिधवलाङ्ग सभूतिसंघ
नागाजिनांशुक नगालय नागशालिन् ।
पञ्चास्य पञ्चविशिखाहित पञ्चताद
भावे भवा भव भवा भव भाविताशु ॥ २६ ॥

श्रीबन्धः

सदा विभातु प्रतिभा मदीया तेऽद्रिजापते ।
गुणस्तुत्या महितया ब्रह्मादिसुरकाम्यया ॥ २७ ॥

पुनर्वृत्तान्तरेण स एव

दिव्याकारं दीनाधारं भव्यामोदं भक्तश्रीदम् ।
नव्यानन्दं नाथं भावे श्रव्यालापं शम्भुं सेवे ॥ २८ ॥

निर्दन्त्यम्

राजहीररमणीयविग्रहं भूरिभव्यभुजगेशभूषणम् ।
ब्रह्मविष्णुपरिसेव्यमीश्वरं भावयामि परमं हि शङ्करम् ॥२९॥

छत्रबन्धः

रमाराज जरामार रहिताग गताहिर ।
रवधीर मताभास सभातामरधीवर ॥ ३० ॥
भजेऽहिवलयं लयङ्गतनयं नयन्तमकलं कलङ्करहितम् ।

हितं सुहसितं सितं जितपुरं पुरन्दरमतं मतङ्गजपरम् ॥३१॥

एकाक्षरश्लोकः

ततातीति-ततातीत तातताततततोततिः
तातितातांत तुत्ता तां तां तां तत्तात्तते ततात् ॥३२॥

उपमा

क्षीराम्भोनिधिवन्नितान्तधवले कैलासभूमीधरे
शम्भुस्साधु विभाति नैकवदनश्शेषो यथा श्वेतभाः ।
तत्कण्ठे गरलं पुरन्दरमणि-स्तोमाभिरामप्रभं
शेषाङ्के शयितस्य गात्रमिव कुण्ठस्य वैसंशोभते ॥ ३३ ॥

एकाक्षरपादः

गोगगोगांगगोंगांग मामुमामीममा समा ।
हे हं हे हे हहाहाह विवोवावा विवा वव ॥ ३४ ॥

मनसि चषकतुल्ये स्थापितं शुद्धशुद्धे
बहुरुचिममृतेन स्फारहारामलेन ।
सदृशमसमदृष्टेर्देहमात्तातितृप्ति-
र्जयति समनुभूयामर्त्यवत्साधु मर्त्यः ॥ ३५ ॥

द्व्यक्षरः

वन्दे देवं वेदविदं देवदेवं वदावदम् ।
दिवि वादवदा विद्या विविदाव विविद्दवम् ॥३६॥

उत्प्रेक्षा

जटास्तडित्पिङ्गलतुङ्गभासो बभासिरे भावज देहदग्धुः ।
ललाटमध्यस्थितलोचनाग्नेः प्रभा इवोर्ध्वप्रसृतास्समन्तात् ॥३७॥

पादावरोहणम्

भाविता दिवि देवेशा शावेदे विदिता विभा ।
दासदारप्रमकरी रीकमप्ररदासदा ।
दासदाप्रमकारी हा हारी कामप्रदा सदा ॥ ३८ ॥
स्थिरं शिरोधौ गरलं विनीलं
गौरीमनः-पद्मरवेश्शिवस्य ।

स्रस्तं शिरस्संस्थसुरापगाया
विभाति शैवालमिवाभिलग्नम् ॥ ३९ ॥

गूढपादाः

शशिभास्करवह्न्यक्षं याजकामितसंमदम् ।
सहेलमश्वसन्मारं भावयामि महेश्वरम् ॥ ४० ॥
लक्ष्मीवन्द्याङ्घ्रिं देवेशं नित्यापत्यं मुक्तागौरम् ।
शौरीड्यं तं नागक्रोधं वन्दे नित्यं गौरीनाथम् ॥ ४१ ॥
निजाशिवदवं मौनिवन्द्यं तं देवतानिधिम् ।
धीरं परतरं वीरं शिवं वन्दे निरन्तरम् ॥ ४२ ॥
सुराणामसुराणां च भक्तानां सर्वसंपदाम् ।

विश्वाणनेधीके तूर्णं शिवेन सद्दशरिशवः ॥ ४३ ॥

नामगोपनम्

समस्तजगदाधार दासरक्षाधुरन्धर ।
शिरःस्थचन्द्र मां पाहि वह्नीन्दुरविलोचन ॥ ४४ ॥
पादचतुष्टयाद्यक्षरैस्सदाशिवेति नाम गुप्तम् ।

सृष्टिस्थित्युपमे

सृष्टिस्थितिरिव प्रायस्स्थितिस्सृष्टिरिवाद्भुता ।
लयस्तद्वत्तौलयवज्जगतां पार्वतीशितुः ॥ ४५ ॥

कर्तृगोपनम्

ब्रह्मादिकाम्यया नित्यं दयया परिपूर्णया ।

क्रियान्मङ्गलमस्माकं गौरीनेतारमव्ययम् ॥ ४६ ॥

उल्लेखम्

योगं मूर्तिधरं विदन्ति परमं योगीश्वराः कामुकाः
शृङ्गाराख्यरसं सकामहृदयाः कल्पद्रुमं केवलम् ।
वह्निं शुद्धतरास्समूढमभितस्सौन्दर्यवत्ताम्बुधा-
विद्यामोक्षमविद्भिदः परतरं शम्भुं भवानीपतिम् ॥४७॥

कर्मगोपनम्

पञ्चवक्त्रः पुरहरः कन्दर्पदमनो बुधः ।
ददातु मे महादेवः पार्वतीप्राणवल्लभः ॥ ४८ ॥
अत्यन्तधवले देहे शिवस्यामृतवारिणि ।

चन्द्रमण्डलविभ्रान्तिश्चकोरीणामभूदरम् ॥ ४९ ॥

क्रियागोपनम्

शिवाव्यय महादेव गङ्गाधर कृपानिधे ।
चन्द्रशेखर गौरीश कैलासाचलवास माम् ॥ ५० ॥

कपालमालाबिसकण्ठिकाली
जटातडिद्भागभिलाषसस्यम् ।
दयाभिवृष्ट्या फलितं करोतु
मनोजजिच्छारदनीरदो मे ॥ ५१ ॥

अर्धभ्रमकम्

भव स्वमतिपारत्वं वरदानस्थिरामल ।

स्वदासनरभारापा मनसश्रीकरस्थितिः ॥ ५२ ॥

परिणामम्

संसारार्णवमग्नस्य ममोन्मज्जनरज्जवः ।
भवन्ति शम्भोः करुणा-कटाक्षाणां प्रवृत्तयः ॥ ५३ ॥

सर्वतोभद्रम्

गौरीनाथ थनारीगौरीशनास्य स्यनाशरी ।
नानातेव वतेनाना धन्यवप्रप्रवन्यध ॥ ५४ ॥

सन्देहः

किं शारदाम्भोधरपंक्तिरेषा
किं चन्द्रिकाक्षीरपयोनिधिः किम् ।

कर्पूरराशिः किमितीश्वरस्य
प्रभान्तनोस्सन्दिहतेति शुभ्राम् ॥ ५५ ॥
चन्द्रः किं स क्रमात् क्षीणः सूर्यः किं स निशापतिः ।
वह्निः किं स जटानद्ध इति सन्दिहते शिवम् ॥ ५६ ॥
विष्णुः किं न स संसारी ब्रह्मा किं न स राजसः ।
वैराग्यसंयमस्फारश्शिवोऽयमिति निश्चयः ॥ ५७ ॥

यमकम्

समस्तगोपालकबालबाल-समस्तगोपालकपालबाल ।
समस्तगोपालकबालबाल समस्तगोपालकपालबाल ॥५८॥
स्मेरगौरीयुतां शुभ्रां वीक्ष्य शम्भुतनुं मुनिः ।

तडिद्रेखान्वितां मेघ-रेखां स्मरति शारदीम् ॥ ५९ ॥

अपह्नुतिः

नायं शिवतनुच्छायानिचयः क्षीरसागरः ।
न कन्धरा विनीलोऽसौ योगनिद्रां गतो हरिः ॥ ६० ॥
सम्पूर्णचन्द्रदेहोऽयं न गौरीनाथविग्रहः ।
मध्यस्थं लाञ्छनमिदं न नीलं कन्धरातलम् ॥ ६१ ॥
असारे दुस्तरे गाधे संसारच्छद्मसागरे ।
निमग्नं मां महादेव कृपारज्ज्वा समुद्धर ॥ ६२ ॥

श्लेषः

भव्यपादो लसच्छृङ्गो घनाध्वगतिरुन्नतः ।

अधिकं प्राप्तसन्तानः पातु मामीश्वरस्य गौः ॥ ६३ ॥
बलसन्तोषदं श्रीदं गोपालं बुधनायकम् ।
हरिं महात्मातिशेते नितरां पार्वतीपतिः ॥ ६४ ॥
श्रीकण्ठं स्फुटनीरसम्भवदृशं वन्दारुकल्पद्रुमं
रत्नोद्भास्वदहीनकङ्कणधरं ब्रह्मादिभिस्संस्तुतम् ।
सत्यं चित्तजवैरिसंभ्रमहरं तं पार्वतीनायकं
नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ६५ ॥
लोकेशं बहुराजराजविनुतं पौलस्त्यसन्तोषदं
सीतारम्यपयोधराधिकलसच्छ्रीकुंकुमालंकृतम् ।
भव्यं साध्वजजातनन्दनपरं कैलासनाथं प्रभुं

नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ६६ ॥
कौसल्यावरनन्दनं गुणयुतं हंसान्वयोल्लासकं
कल्याणं वरराजशेखरमतिप्रालेयशैलाश्रयम् ।
बाणोत्खातमहागजासुरशिरोभारं मुनीन्द्रस्तुतं
रम्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ६७ ॥
हस्तस्वीकृतबाणमुज्ज्वलतनुं भास्वद्विभूतेर्दधं
नित्यं सद्वृषवाहमन्धकरिपुं रुद्राक्षमालाधरम् ।
नानाशेषशिरः-किरीटविलसन्माणिक्यशोभोज्ज्वलं ।
नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ६८ ॥
अत्यन्तानिलसूनुवन्दितपदं श्रीचन्दनालंकृतं

कान्तं मोहनवालिनाशनकरं सद्धर्ममार्गाकरम् ।
विश्वामित्रसुयागवर्धनमहोत्कृष्टप्रभादर्शकं
नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ६९ ॥
दीव्यद्रश्मितमोनुदर्धविलसत्सद्धानुपट्टं विभुं
शान्तं पूर्णनभोंऽशुकं निजजनाधारं कृपासागरम् ।
देवेशं गुहमानसाम्बुजदिनाधीशं प्रियं शङ्करं
नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ७० ॥
कामं लक्ष्मणहस्तपङ्कजकृतप्रेमादिपूजादृतं
सानन्दं भरतप्रमोदनिलयं धीरं समन्त्राधिपम् ।
हर्तारं खरदूषणाहृतिपदं साकेतवासादरं

नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ७१ ॥
पादाक्रान्तविभीषणं रणमुखे सद्रत्नसिंहासना-
रूढं भीमधनुःप्रभञ्जनवरश्रीकीर्तिमालाधरम् ।
कुन्दानन्दनमन्दहासमतुलं श्रीरामचन्द्रं मुदा
नित्यं मानसवासमीश्वरमहं रामाकृतिं भावये ॥ ७२ ॥
धराधरसुतानाथश्चन्द्रमाश्च शुचिस्सदा ।
प्रभासतेऽमृतकरः परमानन्ददायकः ॥ ७३ ॥
परिशुद्धामृतमयी शीतला शिरसि स्थिता ।
शङ्करस्वर्णदीचन्द्रकला चालं करोत्वलम् ॥ ७४ ॥
सम्प्रेक्ष्य लज्जितारशम्भोर्महिमानं महोन्नतम् ।

सम्प्राप्तमुखवैवर्ण्या ब्रह्मविष्णुपुरन्दराः ॥ ७५ ॥
उत्फुल्लमल्लीकुसुमनिकुरम्बप्रभायुता ।
मूर्तिर्मम मनस्यष्टमूर्तेस्तिष्ठतु सन्ततम् ॥ ७६ ॥
प्रवदन्ति वृथा कथास्सदा
शिवमाहात्म्यमपास्य ये जनाः ।
अमृतं प्रविहाय जिह्वया
भुवने मूत्रजलं पिबन्ति ते ॥ ७७ ॥

प्रतीपालङ्कारः

सत्यां सधर्मादिसमस्तकाम-
प्रधानशक्तौ परमेशभक्तौ ।

वृथैव चिन्तामणिकामधेनु-
सुरद्रुमाणां भुवने प्रतिष्ठाः ॥ ७८ ॥
शङ्करस्य शरीरेण साम्यं प्राप्तुं सुधाकरः ।
असमर्थस्सेवते तं भूत्वा चूडामणिस्सदा ॥ ७९ ॥

अतिशयोक्तिः

स्वाङ्गेषु मस्तप्रमुखेषु नित्यं
ये पूरुषाश्शङ्करसम्मतानि ।
बध्नन्ति रुद्राक्षविभूषणानि
प्रारब्धबन्धा न भवन्त्यमीषाम् ॥ ८० ॥
दूरतश्शिवभक्तस्य वचनश्रवणेन च ।

यमस्य हृदयं भिन्नं भवत्यत्यन्तकम्पितम् ॥ ८१ ॥

यः श्रीकरं बालममन्त्रतन्त्रं
क्रीडादरात्स्वं परिपूजयन्तम् ।
शिवः कृतार्थं कृतवांस्तदेन-
मयं किमात्मीयमुपेक्षते माम् ॥ ८२ ॥

यो जनश्शिवकथामृतं सदा
जिह्वया श्रुतियुगेन वा मुहुः ।
वेदवेदशिरसाङ्गणाच्च्युतं
स्वीकरोति शिव एव स ध्रुवम् ॥ ८३ ॥

यदोपदिष्टा श्रवणे शिवस्य

पञ्चाक्षरी गर्गमुनीश्वरेण ।
निर्याय भूपस्य तथैव गात्रात्
काकात्मना पापचयः प्रदग्धः ॥ ८४ ॥

पुरुषस्य प्रणश्यन्ति महापातककोटयः ।
वाक्पादपद्मयुग्मस्य स्मरणात्पार्वतीपतेः ॥ ८५ ॥

उदाहरणम्

ये पूजयन्ति शिवपादयुगं जयन्ति
तेषां गृहेषु नवरत्नचयास्सधान्याः ।
रौप्यं सुवर्णममितं च गजा हयाश्च
भव्याम्बराणि च बहुश्रुतपुत्रपौत्राः ॥ ८६ ॥

व्यतिरेकाः

नीचेषु देहेष्वगृहीतजन्मा
मुहुः परस्त्रीष्वविलोलचित्तः ।
अधेनुपालः प्रलयेप्यनाशो
विभाति विष्णोरधिको महेशः ॥ ८७ ॥

सहोक्तिः

अहो महद्भिर्दुरितैरनेक-
जन्मार्जितैः साकमनेकवारम् ।
साष्टाङ्गमीशं नमतां नराणां
पतंत्यथ स्वेदलवास्तनुभ्यः ॥ ८८ ॥

विभावना

विना स्नानं सन्ध्यां जपमपि हुतं तर्पणविधिं
पितॄणां स्वाध्यायं नियतमपि नैमित्तिकमपि ।
स्थितिं क्षेत्रे दानं श्रवणमननेऽकारणमहो
श्रितिश्रीकण्ठानां भवति फलमेषां समुदितम् ॥ ८९ ॥

विशेषोक्तिः

अतितरे यमभीषणभाषणे-
ऽप्यरिषु काममुखेषु धृढेष्वपि ।
भयमुपैति न किञ्चिदपि स्फुरत्
पुरजिदंघ्रिसरोजयुगश्रितः ॥ ९० ॥

विनोक्तिः

पतिभक्त्या विना योषित् सौन्दर्यं न विराजते ।
जन्म पुंसो विना भक्त्या पार्वतीहृदयेशितुः ॥ ९१ ॥

विषमः

तामसाल्लोकसंहारहेतोरुग्रात्प्रजायते ।
शान्तिर्विचित्रं महती जगत्पालनशालिनी ॥ ९२ ॥

यथा वा

नामामृतरसैः पुंसश्शाङ्करैः कर्णसङ्गतैः ।
तूलवत्परिदह्यन्ते पातकानि बहून्यपि ॥ ९३ ॥

प्रमदेन वञ्चयितुमेत्य सत्वरं
परमं शिवं सशरचापभीषणः ।
स्वयमेव तन्निटिलनेत्रवह्निना
भवदाशुदग्धवपुरिन्दिरासुतः ॥ ९४ ॥
समस्तलोकाधिपतिर्महात्मा
क्व त्वं क्व चाहं कुमतिः कुमर्त्यः ।
इदं महद्वाञ्छितमीश मे यत्
प्रकामये त्वत्पदपद्मसेवाम् ॥ ९५ ॥

अधिकः

परमाणुस्वरूपेपि निजभक्तस्य मानसे ।

वर्तते सततं देवो महीयानम्बिकापतिः ॥ ९६ ॥
मर्त्यलोकेतिविस्तारे वर्तमानं भयाकुलम् ।
मामल्पमेकं हे शम्भो समुद्धर कृपारसात् ॥ ९७ ॥

विचित्रम्

देहाश्रितान्यशेषाणि निर्दग्धुं पातकानि मे ।
देहं सिञ्चाम्यहं शम्भोरभिषेकोदबिन्दुभिः ॥ ९८ ॥

अन्योन्यम्

शैवं शिरः कान्तिमुपैति पूर्णं
चन्द्रस्य नित्यं कलया समेतम् ।

चान्द्री कला शैवशिरःप्रतिष्ठां
प्रपद्य संयाति नितान्तशोभाम् ॥ ९९ ॥

असङ्गतिः

प्रोक्षितश्शुचिकणैर्बहिरङ्गे
भूतभर्तुरभिषेकजलस्य ।
अन्तरङ्गमचिराय जनानां
निर्मलं भवति साधु विचित्रम् ॥ १०० ॥

व्याघातः

मूलप्रमाणरहितो निर्गुणो निष्कलो विभुः ।
अनाथो भोगविधुरो नावाच्यं दैवतं शिवः ॥ १०१ ॥

तद्गुणः

तडिन्निभजटाकान्ति-ग्रहणात्स्वर्णदी सिता।
सरस्वतीव संरेजे शङ्करस्य शिरोगता ॥ १०२ ॥

उत्तरम्

कुत्रास्ते शङ्करो नित्यं कैलासे भक्तहृद्यपि।
कुत्रास्ते पार्वती नित्यं वामाङ्केऽनङ्गवैरिणः ॥ १०३ ॥
वेदशास्त्रपुराणानि सेतिहासस्मृतीन्यहम्।
जानामि सद्वचस्सर्वेषां तात्पर्यं साम्बशङ्करे ॥ १०४ ॥

प्रश्नोत्तरिका

कन्दर्पदमनं वक्ति पुराणाममरद्विषाम्।

कामाशां कृतवान्व्यर्थां क्षणात्कोपेन शङ्करः ॥ १०५ ॥

परिसंख्या

कस्सर्वेशः पार्वतीशो न ब्रह्मा न हरिस्तथा।
भुक्तिमुक्तिप्रदा शीघ्रं का भक्तिस्साम्बशङ्करे ॥ १०६ ॥
सर्वस्य सत्सर्वमनोरथानां
दाता महेशो न सुरद्रुमौघः।
मही धराधीशसुताधिनाथो
दीनेषु सर्वेषु सदा दयावान् ॥ १०७ ॥
अभक्तता मूर्खजने अभानं स्याद्दिवाविधौ।
गदाहतिर्युद्धतले नेषद्दीने शिवं श्रिते ॥ १०८ ॥

मूर्धन्यलिके च गले च गङ्गां
वह्निं विषं शम्भुरहो दधाति ।
हिताहितानां सततं जनाना-
मानन्ददुःखे विदधाति नित्यम् ॥ १०९ ॥

परिवृत्तिः

यदृच्छया बिल्वदलं समर्प्य
पुमान् सुबुद्धिः परमेश्वराय ।
गृह्णाति मुक्तिं परमां हिरण्य-
गर्भादिकाम्यामचिराय तस्मात् ॥ ११० ॥

नवोत्तमाङ्गानि समर्प्य भक्त्या
पुरारये स्वानि सुरासुराद्यैः ।
अवध्यतां तामव मां ययाचे
तं मुक्तिदं रावणनामरक्षः ॥ १११ ॥
लोकातीतं भक्तिपूर्वं तपस्वं
गौरी देवो भूतभर्त्रे समर्प्य ।
तद्वाल्लभ्यं स्वीचकाराद्वयं श्री-
वाणीमुख्यस्त्रीकदम्बाभिनुत्यम् ॥ ११२ ॥

समुच्चयः

सृजति रक्षति नाशयति स्फुटं

भुवनजालमभीप्सितमैहिकम् ।
दिशति मुक्तिमपि स्मरतामघं
हरति भाति जयत्यपि शङ्करः ॥ ११३ ॥

शमं दमं च वैराग्यमैश्वर्यं करुणाधियम् ।
शौर्यं धैर्यं च गाम्भीर्यं सदा वहति शङ्करः ॥ ११४ ॥

अनुकल्पः

शिवो धवा शिवा सर्वलोकानां परिरक्षणम् ।
विधातुं कल्पते नित्यं दयया परिपूर्णया ॥ ११५ ॥

सारम्

मनुष्या जन्तुषूत्कृष्टा ब्राह्मणास्तेषु तेष्वपि ।

देवतोपासकास्तेषु शिवोपास्तिपरायणाः ॥ ११६ ॥

मीलनम्

ताण्डवायाससंजाताश्शिवाङ्गे स्वेदबिन्दवः ।
शिरस्तस्स्रस्तगङ्गाम्भोबिन्दुजालैस्तिरोहिताः ॥ ११७ ॥

समालङ्कारः

परयोः सुन्दरतरयोः सुरशुभकरयोरुमामहेश्वरयोः ।
अनुरूपतमं योगं मन्ये त्रिभुवनतलश्लाघ्यम् ॥ ११८ ॥

तत्करः

स्नानेन दानेन जपेन भक्त्या
विभूतिरुद्राक्षधृतेश्च नित्यम् ।

दोषप्रपूजास्तुतिभावनाभिः
शिवः प्रसादं कुरुते जने स्वम् ॥ ११९ ॥

एकावलिः

जन्मालंकुरुते सम्पत्तां पात्रप्रतिपादनम् ।
तच्छिवार्पितताबुद्धिस्तां भक्तिर्भुवनत्रये ॥ १२० ॥

सूक्ष्मम्

किं पत्युस्तव नामेति पृष्टा सख्यागनन्दना ।
हस्तेन स्तनकस्तूरीं तस्या लिप्तवती गले ॥ १२१ ॥

सामान्यम्

नीलकण्ठस्य संलिप्ता कण्ठे गौर्या रहस्यलम् ।

कस्तूरी संवृता ज्ञाता गन्धतः प्रमथादिभिः ॥ १२२ ॥

अर्थान्तरन्यासः

महात्मा सहते कष्टं परेषां हितकारणात् ।
पार्वतीरमणः कण्ठे कालकूटं बिभर्ति हि ॥ १२३ ॥

तपसा परितोषितः शिवो-
वृत तादृङ्नियमेपि पार्वतीम् ।
भुवनेषु महाजना नृणां
सुगुणैराशु वशंवदास्सदा ॥ १२४ ॥

विशेषोक्तिः

अविद्यां मलिनां नित्यं श्लिष्यन्नपि परश्शिवः ।

अगृह्णंस्तन्मलिनतां भाति शुद्धतरस्स्वयम् ॥ १२५ ॥

अर्थापत्तिः

त्वद्दासदासस्य पदं कदाचित्
स्पृष्ट्वा भवत्याशु पुमान् कृतार्थः ।
अये पुरारे किमुत त्रिसन्ध्यं
भवत्पदाम्भोरुहयुग्मसेवी ॥ १२६ ॥

काव्यलिंगम्

अपारसंसारसमुद्रमग्नः
कठोरतापत्रयपीडितोऽहम् ।

चलेन्द्रियाकृष्टमना महेश
शम्भो भवन्तं हृदि विस्मरामि ॥ १२७ ॥

न बिभेमि यमादतिभीषणवाक्-
पटुहुंकृतिकिङ्करकोटियुतात् ।
यमशासननाम वदामि कदा-
प्यवसादपि भक्तभयोन्मथनम् ॥ १२८ ॥

पर्यायोक्तिः

श्रीपार्वतीरमणपूजनतत्पराणां
नित्यं भवन्ति भवनानि महोज्ज्वलानि ।

रङ्गन्मतङ्गजतुरङ्गमपुङ्गवाली-
व्याप्ताजिराणि धनधान्यसमञ्जितानि ॥१२९॥

दृष्टान्तः

वर्णयन्ति परं शम्भोर्गणा गुणकदम्बकम् ।
पिबन्ति मधुरं क्षीरं पयोधेरमृतं सुराः ॥ १३० ॥

प्रतिवस्तूपमा

समर्थं शाङ्करं नाम पापानां नाशने नृणाम् ।
शक्तं प्रभाकरं बिम्बं विध्वंसे तमसां दिशाम् ॥ १३१ ॥

प्रत्यनीकम्

कामस्स्वदेहं दहतश्शिवस्य
तिरस्कृतौ शक्त्ययुतोग्निकीलैः ।
वाहोद्भवैर्म्लानबलैस्स्वकीयैः
फलद्रुमं तस्य वनं चकार ॥ १३२ ॥

व्यापृते पुरुषे पुण्यैर्भवबन्धविमोचने ।
दीनबन्धोर्महेशस्य प्रससार दया हठात् ॥ १३३ ॥

भाविकम्

पुरत्रये गिरीशेन प्रदग्धे तूलराशिवत् ।
एकदैव हृताऽऽलोको व्यानसे भुवनेऽभितः ॥ १३४ ॥

विशेषः

स्वर्गे भुवि च पाताले रवौ योगिमनस्सु च ।
एकथावस्थितं दाम शैवमेकं प्रियं मम ॥ १३५ ॥
प्रारब्धभोगनिलये देहे सत्यपि सेवितुः ।
प्रदातुं सरमां मुक्तिं समर्थस्साम्बशङ्करः ॥ १३६ ॥
कैलासशिखरस्थस्य पार्वतीशस्य पादयोः ।
समीपे सन्ति मे प्राणा मनसश्चालनं सदा ॥ १३७ ॥
को विवादस्तया मूर्खं न परं दैवतं शिवात् ।
तथापि ब्रह्मविष्ण्वादीन् सेवन्ते तान् सदा नतम् ॥ १३८ ॥
कार्या त्वया शिवार्चेति वचनं न वदामि ते ।

दारिद्र्यकष्टानुभवात्तुष्टचित्तो भवान् ध्रुवम् ॥ १३९ ॥
किञ्चिद्धितं शिवाभक्त कथयामि तव शृणु ।
मद्विशेषोक्तितः किं त्वं वेत्सि दुःखं भवोद्भवम् ॥ १४० ॥
एषोग्निस्स ॰जलान्नष्टः सूर्योऽसौ स तमोवृतः ।
चन्द्रोऽसौ संक्षयोत्यन्ते विदन्ति मुनयश्शिवम् ॥ १४१ ॥

वक्रोक्तिः

शिवे मां भज हे स्थाणो लक्ष्म्या कार्यं न मे प्रिये ।
किं न जानासि मे वाणीं ब्रह्माणी ते कुतः शिव ॥ १४२ ॥
मयि नास्ति तव प्रीतिर्हर गङ्गाधर प्रभो ।
त्वयि नास्ति शिवे प्रीतिः किं मृषा भाषसे वृथा ॥ १४३ ॥

परिकरः

सर्वविद्यानिधिर्लक्ष्मीपूजितः पापसंहरः ।
मृत्युंजयः कृपाशाली पातु मामीश्वरस्सदा ॥ १४४ ॥

विकल्पः

मुमुक्षो मद्वचः श्रुत्वा कैलासस्थं भवं भज ।
विषयानुभवैकश्रीसदानन्दो भवं भज ॥ १४५ ॥

अप्रस्तुतप्रशंसा

किं चञ्चलस्वभावाले भ्रमस्यल्पसुमालिषु ।
अस्ति ते निस्तुलं पद्मं त्वन्मनोभीष्टदं सदा ॥ १४६ ॥

अभिनन्द्य तपोधिष्ठं वितीर्याभीप्सितं वरम् ।
शिवेन दयया भक्ता बहवः परिरक्षिताः ॥ १४७ ॥
सकृद्यो वक्ति नामैशं महादेवेति जिह्वया ।
पुरुषस्य क्षणात्तस्य ब्रह्महत्यापि नश्यति ॥ १४८ ॥
कैलासशैलशिखरे विद्यमाने महेश्वरे ।
वैवर्ण्यमधिकं जातं ब्रह्मादीनां मुखेष्वपि ॥ १४९ ॥
सदा पश्यति सर्वत्र शिवे सोमे कृपानिधौ ।
किमाश्चर्यं तवात्यन्तं के दीना भुवनान्तरे ॥ १५० ॥

व्याजस्तुतिः

कथं श्लाघ्यः शिवः स्वेषां संसारसुखनाशकः ।

भूतिधारी प्रलयकृत् साक्षात्कामं विघातुकः ॥ १५१ ॥
महती भाग्यसम्पत्तिरभक्तानामुमापतेः ।
भजन्ति बहु जन्मानि पुत्रादिसुखदानि ये ॥ १५२ ॥

कारणमाला

भक्तिभावाच्चित्तशुद्धि-
श्चित्तशुद्ध्याऽवबोधनम् ।
बोधात् साक्षात्कृतिः शम्भोः
साक्षात्कृत्या भवो भवेत् ॥ १५३ ॥

अनुमानम्

शिवो भवेत् परं ब्रह्म यदेष प्रलयेपि सन् ।

शिवो मृतं न चेदस्य परमानन्दता कुतः ॥ १५४ ॥

समासोक्तिः

आशां शुकः कलाशाली मृगयुक्तस्तमोपहः ।
परिशुद्धतनुः शम्भुर्लोकानाह्लादयत्यलम् ॥ १५५ ॥

मालादीपकम्

दमेन प्रशमो भाति प्रशमेन विरक्तता ।
वैराग्येण तपो नित्यं तपसा साम्बशङ्करः ॥ १५६ ॥

विरोधाभासः

इनः शुचिः शीतरुचिः तापहारी लघुर्गुरुः ।
सद्गतिर्विक्रमी श्रीदः प्राक्सद्रम्यः शिवोवतु ॥ १५७ ॥

पर्यायः

पुरा मातृकुक्षौ ततो दारुगेहे
ततः प्रेतभूमौ ततो धर्मपुर्याम्।
महासङ्कटेनेकदुःखातिपूर्णे
जनस्तिष्ठति श्रीमहेशाभिपूर्णः ॥ १५८ ॥

जनस्य सदने यस्मिन् प्रागलक्ष्मीः स्थिता ततः।
शिवपूजाविधानेन लक्ष्मीस्तत्रैव संस्थिता ॥ १५९ ॥

स्वभावोक्तिः

गच्छन्तं मन्दमन्दं मधुरतररणत्कन्धराकिङ्किणीकं

लाङ्गूलं चालयन्तं मुहुरवनितलं संलिखन्तं खुराग्रैः।
धुन्वन्तं भव्यरुक्माभरणभरितयोः शृङ्गयोर्मण्डलं सत्
तुङ्गं प्रेमाधिरूढो ऋषभमा[illegible]सत्वीश्वरो मे हृदब्जम् ॥ १६० ॥

रजतार्कमणिस्फारा मौक्तिकीं जपमालिकाम्।
दिव्याममृतभाण्डं च चिन्मुद्रां दधतं करैः ॥ १६१ ॥

भुजङ्गविलसत्कक्ष्यं चन्द्रमःखण्डमण्डितम्।
त्रिलोचनमुमानाथं नागाभरणशोभितम् ॥ १६२ ॥

प्रसन्नवदनं शान्तं सर्वविद्यानिधिं सुरैः।
संस्तुतं दक्षिणामूर्तिं सदाशिवमहं भजे ॥ १६३ ॥

श्रीकरी पठतामेषा शिवकर्णामृतस्तुतिः ।
शिवानन्दकरी नित्यं भूयादाचन्द्रतारकम् ॥ १६४ ॥

इति श्रीभरद्वाजमुनिकृते शिवकर्णामृतस्तोत्रे
तृतीयोऽध्यायः ।

सर्वं सम्पूर्णम्

श्रीसा[illegible]शिवार्पणमस्तु

इति

शिवकर्णामृतस्तोत्रम्

प्रकाशकः—

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

ई० १९६७

मुद्रकः—वि[illegible]ाविलास प्रेस, वाराणसी-१